# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ५ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.C.- 2.3.5. New ) | गुणाः – ७० |
| दिनाङ्कः – १४/१०/२०१९ | सन्दर्भग्रन्थः हरिवाक्यसुधासिन्धुः | समयः –८.०० तः ११.०० |

**प्रथमान्वितिः**

**प्रश्नः १ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या।** (१०)

(१) एवं विश्वभवादीनि यो विजानाति तत्वतः ।
तस्य कृष्णे भवेद्भक्तिर्विरक्तरिरितरत्र च ॥

(२) अच्युतस्य च्युतिर्नस्यात्क्षरताय नाक्षरस्य च ।
जीवत्वादि कथंकारं वाच्यं भगवतस्ततः ॥

(३) एवं स्वेनैव भगवान् स्वयं निश्चीयते ध्रुवम् ।
नान्यथा निश्चयं तस्य कर्तुं शक्यं हि मायिकैः ॥

**प्रश्नः २ कस्यचिद् एकस्य प्रश्नस्योत्तरं लेख्यम्।** (१०)

(१) यथाग्रन्थं सृष्ट्युत्पत्तिक्रमम् उपपादयत ।

(२) लौकिकेन्द्रियैः भगवत्साक्षात्कारो भवति न वा ? यथाग्रन्थं लिखत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या।** (१०)

(१) एव चतुर्विधा भक्ता भवन्त्यत्र रमापतेः ।
तत्र तस्य गुणो मुख्यो यः स्वात्कार्यः सः वै दृढः ॥

(२) मायिकाकाररहितः स्वतन्त्रो दिव्यविग्रहः ।
समस्तकल्याणगुणैरुपेतश्च स वर्णितः ॥

(३) सितवासः साधुभिश्च गृहिभिः परितोवृतः ।
सद्भिः स वाद्यगीतानि कृष्णपद्यानि सोऽश्रृणोत् ॥

**प्रश्नः ४ कस्यचिद् एकस्य प्रश्नस्योत्तरं देयम्।** (१०)

(१) सप्तचत्वारिंशत्तरङ्गानुगुणं भक्तलक्षणानि वर्णयत ।

(२) द्विपञ्चाशत्तरङ्गस्य सारतत्वं लिखत ।

## तृतीयान्वितिः

**प्रश्नः ५ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** (१०)

(१) प्रेमवृद्धिर्भवेत्स्वस्मिन् भक्तानां भूतले नृणाम् ।
इति कृष्णस्तत्जातिर्जायते कृपया स्वयम् ॥

(२) न तद्भासयते सूर्यो न शशांको न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

(३) एवं तु दश्यते नैव श्रूयते च नहि क्वचित् ।
एकाकिनां तु मुक्तत्वं श्रूयते प्राक्तसतामपि ॥

**प्रश्नः ६ कस्यचिद् एकस्य प्रश्नस्योत्तरं लेख्यम् ।** (१०)

(१) छातततमस्तरङ्गस्य सारतत्वं लिखत ।

(२) षट्चत्वारिंशदधिकशततमस्तरङ्गे वर्णितविषयान् लिखत ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु दशप्रश्नानामुत्तराणि लिखत ।** (१०)

(१) हरिवाक्यसुधासिन्धौ कति तरङ्गाः सन्ति ?

(२) कति महाभूतानि ?

(३) वायोः लक्षणं लिखत ।

(४) त्रयोदशस्तरङ्गे कति श्लोकाः ?

(५) पृथिवीयं कति योजनविस्तृता ?

(६) कः सच्चिद्रूपोऽस्ति ?

(७) अष्टत्रिंशे तरङ्गे कति श्लोकाः ?

(८) त्रयस्त्रिंशस्तरङ्गे कति श्लोकाः ?

(९) जीवनां कति वृत्तयः ?

(१०) मायायाः कृति गुणाः ?

(११) केन यथाशक्ति हरेर्वाक्यं पाल्यम् ?

(१२) प्राणः केन गुणेन जायते ?

(१३) कृष्णाश्रयोऽप्युत्तमादिभेदेन कतिविधो मतः ?

(१४) हरिवाक्यसुधासिन्धुः ग्रन्थस्य कर्ता कः ?

(१५) सेतुमाला टीका केन विरचिता ?

--००--